
हर हर शङ्कर ॐ जय जय शङ्कर





श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरण-लघु-पूजा-पद्धतिः ॥

**५१२८ पराभवः-वृषभः-१७ / शाङ्कर-संवत्सरः २५३५ (३१.५.२०२६)**

(आचम्य)

[विघ्नेश्वरपूजां कृत्वा।]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥

प्राणान् आयम्य। (अप उपस्पृश्य, पुष्पाक्षतान् गृहीत्वा)

मम उपात्त-समस्त-दुरित-क्षय-द्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलि-युगे प्रथमे पादे जम्बू-द्वीपे भारत-वर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये **पराभव**-नाम-संवत्सरे **उत्तरायणे वसन्त**-ऋतौ **वृषभ-अधिक-ज्यैष्ठ**-मासे **शुक्ल**-पक्षे (१४:१५) **पौर्णमास्यां** (१४:१५) शुभतिथौ **भानु**वासरयुक्तायाम् **अनुराधा**-नक्षत्रयुक्तायां **सिद्ध**-योगयुक्तायां

**बव**-करण (१४:१५; **बालव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **पौर्णमास्यां** (१४:१५) शुभतिथौ

- उत्तराषाढा-नक्षत्रे धनूराशौ आविर्भूतानां श्रीमत्-शङ्कर-विजयेन्द्र-सरस्वती-श्रीपादानां, शतभिषङ्-नक्षत्रे कुम्भ-राशौ आविर्भूतानां श्रीमत्-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीपादानाम् अस्माकं जगद्गुरूणां दीर्घ-आयुः-आरोग्य-सिद्ध्यर्थं महात्रिपुरसुन्दरी-समेतं चन्द्रमौलीश्वरं सम्प्रार्थ्य,
- तैः सङ्कल्पितानां सर्वेषां लोक-क्षेमार्थ-कार्याणां वेद-शास्त्रादि-सम्प्रदाय-पोषण-कार्याणां विविध-क्षेत्र-यात्राणां च अविघ्नतया सम्पूर्त्यर्थं
- कामकोटि-गुरु-परम्परायां कामकोटि-भक्त-जनानाम् अचञ्चल-भावशुद्ध-दृढतर-भक्ति-सिद्ध्यर्थं, परस्पर-ऐकमत्य-सिद्ध्यर्थं
- भारतीयानां महाजनानां विघ्न-निवृत्ति-पूर्वक-सत्कार्य-प्रवृत्ति-द्वारा ऐहिक-आमुष्मिक-अभ्युदय-प्राप्त्यर्थम्, असत्-कार्येभ्यः निवृत्त्यर्थं
- भारतीयानां सन्ततेः सनातन-सम्प्रदाये श्रद्धा-भक्त्योः अभिवृद्ध्यर्थं
- सर्वेषां द्विपदां चतुष्पदाम् अन्येषां च प्राणि-वर्गाणाम् आरोग्य-युक्त-सुख-जीवन-अवाप्त्यर्थम्
- अस्माकं सह-कुटुम्बानां धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थं विवेक-वैराग्य-सिद्ध्यर्थं

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरण-प्रीत्यर्थं श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरण-जयन्ती-महोत्सवे यथाशक्ति-ध्यान-आवाहनादि-षोडशोपचारैः श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरण-पूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये।
[कलशपूजां कृत्वा।]

# ॥ ध्यानम् ॥

श्रुति-स्मृति-पुराणानाम् आलयं करुणालयम्।
नमामि भगवत्पाद-शङ्करं लोक-शङ्करम्॥

गामाक्रम्य पदेऽधिकाञ्चि निबिडं स्कन्धैश्चतुर्भिस्तथा
व्यावृण्वन् भुवनान्तरं परिहरंस्तापं स-मोह-ज्वरम्।
यः शाखी द्विज-संस्तुतः फलति तत् स्वाद्यं रसाख्यं फलं
तस्मै शङ्कर-पादपाय महते तन्मस्-त्रि-सन्ध्यं नमः॥

अज्ञानान्तर्गहन-पतितान् आत्म-विद्योपदेशैः
त्रातुं लोकान् भव-दव-शिखा-ताप-पापच्यमानान्।
मुक्त्वा मौनं वट-विटपिनो मूलतो निष्पतन्ती
शम्भोर्मूर्तिश्चरति भुवने शङ्कराचार्य-रूपा॥

अपारकरुणासिन्धुं ज्ञानदं शान्तरूपिणम्।
श्रीचन्द्रशेखरगुरुं प्रणमामि मुदाऽन्वहम्॥

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणान् ध्यायामि। श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणान् आवाहयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आसनं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्वागतं व्याहरामि। पूर्णकुम्भं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, पाद्यं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अर्घ्यं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, आचमनीयं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मधुपर्कं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, स्नपयामि। स्नानानन्तरम् आचमनीयं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, वस्त्रं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, यज्ञोपवीतं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दिव्य-परिमलगन्धान् धारयामि। गन्धस्योपरि हरिद्राकुङ्कुमं समर्पयामि।

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अक्षतान् समर्पयामि। पुष्पैः पूजयामि।

## ॥ श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः ॥

श्री-चन्द्रशेखरेन्द्रास्मदाचार्याय नमो नमः
श्री-चन्द्रमौलि-पादाब्ज-मधुपाय नमो नमः
आचार्य-पादाधिष्ठानाभिषिक्ताय नमो नमः
सर्वज्ञाचार्य-भगवत्-स्वरूपाय नमो नमः
अष्टाङ्ग-योग-सन्निष्ठा-गरिष्ठाय नमो नमः
सनकादि-महायोगि-सदृशाय नमो नमः
महादेवेन्द्र-हस्ताब्ज-सञ्जाताय नमो नमः
महायोगि-विनिर्भेद्य-महत्त्वाय नमो नमः
कामकोटि-महापीठाधीश्वराय नमो नमः
कलि-दोष-निवृत्त्येक-कारणाय नमो नमः १०
श्री-शङ्कर-पदाम्भोज-चिन्तनाय नमो नमः
भारती-कृत-जिह्वाग्र-नर्तनाय नमो नमः
करुणा-रस-कल्लोल-कटाक्षाय नमो नमः
कान्ति-निर्जित-सूर्येन्दु-कम्राभाय नमो नमः
अमन्दानन्द-कृन्मन्द-गमनाय नमो नमः
अद्वैतानन्द-भरित-चिद्-रूपाय नमो नमः
कटी-तट-लसच्चारु-काषायाय नमो नमः
कटाक्ष-मात्र-मोक्षेच्छा-जनकाय नमो नमः
बाहु-दण्ड-लसद्-वेणु-दण्डकाय नमो नमः
फाल-भाग-लसद्-भूति-पुण्ड्रकाय नमो नमः २०
दर-हास-स्फुरद्-दिव्य-मुखाब्जाय नमो नमः
सुधा-मधुरिमामञ्जु-भाषणाय नमो नमः
तपनीय-तिरस्कारि-शरीराय नमो नमः

तपः-प्रभा-सदा-राजत्-सुनेत्राय नमो नमः
सङ्गीतानन्द-सन्दोह-सर्वस्वाय नमो नमः
संसाराम्बुधि-निर्मग्न-तारकाय नमो नमः
मस्तकोल्लासि-रुद्राक्ष-मकुटाय नमो नमः
साक्षात्-पर-शिवामोघ-दर्शनाय नमो नमः
चक्षुर्गत-महा-तेजोत्युज्ज्वलाय नमो नमः
साक्षात्-कृत-जगन्मातृ-स्वरूपाय नमो नमः ३०
क्व-चिद्-बाल-जनात्यन्त-सुलभाय नमो नमः
क्व-चिन्महा-जनातीव-दुष्प्रापाय नमो नमः
गो-ब्राह्मण-हितासक्त-मानसाय नमो नमः
गुरु-मण्डल-सम्भाव्य-विदेहाय नमो नमः
भावना-मात्र-सन्तुष्ट-हृदयाय नमो नमः
भाव्यातिभाव्य-दिव्य-श्री-पदाब्जाय नमो नमः
व्यक्ताव्यक्ततरानेक-चित्-कलाय नमो नमः
रक्त-शुक्ल-प्रभा-मिश्र-पादुकाय नमो नमः
भक्त-मानस-राजीव-भवनाय नमो नमः
भक्त-लोचन-राजीव-भास्कराय नमो नमः ४०
भक्त-कामलता-कल्पपादपाय नमो नमः
भुक्ति-मुक्ति-प्रदानेक-शक्ति-दाय नमो नमः
शरणागत-दीनार्त-रक्षकाय नमो नमः
शमादि-षट्क-सम्पत्-प्रदायकाय नमो नमः
सर्वदा सर्वथा लोक-सौख्य-दाय नमो नमः
सदा नव-नवाकाङ्क्ष्य-दर्शनाय नमो नमः
सर्व-हृत्-पद्म-सञ्चार-निपुणाय नमो नमः
सर्वेङ्गित-परिज्ञान-समर्थाय नमो नमः
स्वप्न-दर्शन-भक्तेष्ट-सिद्धि-दाय नमो नमः
सर्व-वस्तु-विभाव्यात्म-सद्-रूपाय नमो नमः ५०
दीन-भक्तावनैकान्त-दीक्षिताय नमो नमः
ज्ञान-योग-बलैश्वर्य-मानिताय नमो नमः

भाव-माधुर्य-कलिताभय-दाय नमो नमः
सर्व-भूत-गणामेय-सौहार्दाय नमो नमः
मूकी-भूतानेक-लोक-वाक्-प्रदाय नमो नमः
शीतली-कृत-हृत्-ताप-सेवकाय नमो नमः
भोग-मोक्ष-प्रदानेक-योग-ज्ञाय नमो नमः
शीघ्र-सिद्धि-करानेक-शिक्षणाय नमो नमः
अमानित्वादि-मुख्यार्थ-सिद्धि-दाय नमो नमः
अखण्डैक-रसानन्द-प्रबोधाय नमो नमः ६०
नित्यानित्य-विवेक-प्रदायकाय नमो नमः
प्रत्यगेक-रसाखण्ड-चित्-सुखाय नमो नमः
इहामुत्रार्थ-वैराग्य-सिद्धि-दाय नमो नमः
महा-मोह-निवृत्त्यर्थ-मन्त्र-दाय नमो नमः
क्षेत्र-क्षेत्रज्ञ-प्रत्येक-दृष्टि-दाय नमो नमः
क्षय-वृद्धि-विहीनात्म-सौख्य-दाय नमो नमः
तूलाज्ञान-विहीनात्म-तृप्ति-दाय नमो नमः
मूलाज्ञानाबाधितात्म-मुक्ति-दाय नमो नमः
भ्रान्ति-मेघोच्चाटन-प्रभञ्जनाय नमो नमः
शान्ति-वृष्टि-प्रदामोघ-जल-दाय नमो नमः ७०
एक-काल-कृतानेक-दर्शनाय नमो नमः
एकान्त-भक्त-संवेद्य-स्वगताय नमो नमः
श्रीचक्र-रथ-निर्माण-सुप्रथाय नमो नमः
श्री-कल्याण-करामेय-सुश्लोकाय नमो नमः
आश्रिताश्रयणीयत्व-प्रापकाय नमो नमः
अखिलाण्डेश्वरी-कर्ण-भूषकाय नमो नमः
सशिष्य-गण-यात्रा-विधायकाय नमो नमः
साधु-सङ्घ-नुतामेय-चरणाय नमो नमः
अभिन्नात्मैक्य-विज्ञान-प्रबोधाय नमो नमः
भिन्नाभिन्न-मतैश्चापि पूजिताय नमो नमः ८०
तत्-तद्-विपाक-सद्-बोध-दायकाय नमो नमः

तत्-तद्-भाषा-प्रकटित-स्व-गीताय नमो नमः
तत्र-तत्र-कृतानेक-सत्-कार्याय नमो नमः
चित्र-चित्र-प्रभाव-प्रसिद्धिकाय नमो नमः
लोकानुग्रह-कृत्-कर्म-निष्ठिताय नमो नमः
लोकोद्धृति-महा-भूरि-नियमाय नमो नमः
सर्व-वेदान्त-सिद्धान्त-सम्मताय नमो नमः
कर्म-ब्रह्मात्म-करण-मर्म-ज्ञाय नमो नमः
वर्णाश्रम-सदाचार-रक्षकाय नमो नमः
धर्मार्थ-काम-मोक्ष-प्रदायकाय नमो नमः ९०
पद-वाक्य-प्रमाणादि-पारीणाय नमो नमः
पाद-मूल-नतानेक-पण्डिताय नमो नमः
वेद-शास्त्रार्थ-सद्-गोष्ठी-विलासाय नमो नमः
वेद-शास्त्र-पुराणादि-विचाराय नमो नमः
वेद-वेदाङ्ग-तत्त्व-प्रबोधकाय नमो नमः
वेद-मार्ग-प्रमाण-प्रख्यापकाय नमो नमः
निर्णिद्र-तेजोविजित-निद्राढ्याय नमो नमः
निरन्तर-महानन्द-सम्पूर्णाय नमो नमः
स्वभाव-मधुरोदार-गाम्भीर्याय नमो नमः
सहजानन्द-सम्पूर्ण-सागराय नमो नमः १००
नाद-बिन्दु-कलातीत-वैभवाय नमो नमः
वाद-भेद-विहीनात्म-बोधकाय नमो नमः
द्वादशान्त-महा-पीठ-निषण्णाय नमो नमः
देश-कालापरिच्छिन्न-दृग्-रूपाय नमो नमः
निर्मान-शान्ति-महित-निश्चलाय नमो नमः
निर्लक्ष्य-लक्ष्य-संलक्ष्य-निर्लेपाय नमो नमः
श्री-षोडशान्त-कमल-सुस्थिताय नमो नमः
श्री-चन्द्रशेखरेन्द्र-श्री-सरस्वत्यै नमो नमः १०८

॥ इति वलङ्गैमान्-ग्रामाभिजनेन हरिहरशास्त्रिसूनुना सुब्रह्मण्यशास्त्रिणा विरचिता

श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीचरणाष्टोत्तरशतनामावलिः सम्पूर्णा॥

# आचार्यपरम्परानामावलिः

## ॥ पूर्वाचार्याः ॥

१. श्रीमते दक्षिणामूर्तये नमः
२. श्रीमते विष्णवे नमः
३. श्रीमते ब्रह्मणे नमः
४. श्रीमते वसिष्ठाय नमः
५. श्रीमते शक्तये नमः
६. श्रीमते पराशराय नमः
७. श्रीमते व्यासाय नमः
८. श्रीमते शुकाय नमः
९. श्रीमते गौडपादाय नमः
१०. श्रीमते गोविन्द-भगवत्पादाय नमः
११. श्रीमते शङ्कर-भगवत्पादाय नमः

## ॥ भगवत्पादशिष्याः ॥

१. श्रीमते सुरेश्वराचार्याय नमः
२. श्रीमते पद्मपादाचार्याय नमः
३. श्रीमते हस्तामलकाचार्याय नमः
४. श्रीमते तोटकाचार्याय नमः
५. श्रीमते पृथिवीधवाचार्याय नमः
६. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः
७. अन्येभ्यः शङ्करभगवत्पाद-शिष्येभ्यो नमः

## ॥ कामकोटि-आचार्याः ॥

१. श्रीमते शङ्करभगवत्पादाय नमः
२. श्रीमते सुरेश्वराचार्याय नमः
३. श्रीमते सर्वज्ञात्म-इन्द्रसरस्वत्यै नमः

४. श्रीमते सत्यबोध-इन्द्रसरस्वत्यै नमः
५. श्रीमते ज्ञानानन्द-इन्द्रसरस्वत्यै नमः
६. श्रीमते शुद्धानन्द-इन्द्रसरस्वत्यै नमः
७. श्रीमते आनन्दज्ञान-इन्द्रसरस्वत्यै नमः
८. श्रीमते कैवल्यानन्द-इन्द्रसरस्वत्यै नमः
९. श्रीमते कृपाशङ्कर-इन्द्रसरस्वत्यै नमः
१०. श्रीमते विश्वरूप-सुरेश्वर-इन्द्रसरस्वत्यै नमः
११. श्रीमते शिवानन्द-चिद्घन-इन्द्रसरस्वत्यै नमः
१२. श्रीमते सार्वभौम-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
१३. श्रीमते काष्ठमौन-सच्चिद्घन-इन्द्रसरस्वत्यै नमः
१४. श्रीमते भैरवजिद्-विद्याघन-इन्द्रसरस्वत्यै नमः
१५. श्रीमते गीष्पति-गङ्गाधर-इन्द्रसरस्वत्यै नमः
१६. श्रीमते उज्ज्वलशङ्कर-इन्द्रसरस्वत्यै नमः
१७. श्रीमते गौड-सदाशिव-इन्द्रसरस्वत्यै नमः
१८. श्रीमते सुर-इन्द्रसरस्वत्यै नमः
१९. श्रीमते मार्तण्ड-विद्याघन-इन्द्रसरस्वत्यै नमः
२०. श्रीमते मूकशङ्कर-इन्द्रसरस्वत्यै नमः
२१. श्रीमते जाह्नवी-चन्द्रचूड-इन्द्रसरस्वत्यै नमः
२२. श्रीमते परिपूर्णबोध-इन्द्रसरस्वत्यै नमः
२३. श्रीमते सच्चित्सुख-इन्द्रसरस्वत्यै नमः
२४. श्रीमते कोङ्कण-चित्सुख-इन्द्रसरस्वत्यै नमः
२५. श्रीमते सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः
२६. श्रीमते प्रज्ञाघन-इन्द्रसरस्वत्यै नमः
२७. श्रीमते चिद्विलास-इन्द्रसरस्वत्यै नमः
२८. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
२९. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
३०. श्रीमते भक्तियोग-बोध-इन्द्रसरस्वत्यै नमः
३१. श्रीमते शीलनिधि-ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
३२. श्रीमते चिदानन्दघन-इन्द्रसरस्वत्यै नमः
३३. श्रीमते भाषापरमेष्ठि-सच्चिदानन्दघन-इन्द्रसरस्वत्यै नमः
३४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः

३५. श्रीमते बहुरूप-चित्सुख-इन्द्रसरस्वत्यै नमः
३६. श्रीमते चित्सुखानन्द-इन्द्रसरस्वत्यै नमः
३७. श्रीमते विद्याघन-इन्द्रसरस्वत्यै नमः
३८. श्रीमते धीरशङ्कर-इन्द्रसरस्वत्यै नमः
३९. श्रीमते सच्चिद्विलास-इन्द्रसरस्वत्यै नमः
४०. श्रीमते शोभन-महादेव-इन्द्रसरस्वत्यै नमः
४१. श्रीमते गङ्गाधर-इन्द्रसरस्वत्यै नमः
४२. श्रीमते ब्रह्मानन्दघन-इन्द्रसरस्वत्यै नमः
४३. श्रीमते आनन्दघन-इन्द्रसरस्वत्यै नमः
४४. श्रीमते पूर्णबोध-इन्द्रसरस्वत्यै नमः
४५. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः
४६. श्रीमते सान्द्रानन्द-बोध-इन्द्रसरस्वत्यै नमः
४७. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
४८. श्रीमते अद्वैतानन्दबोध-इन्द्रसरस्वत्यै नमः
४९. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
५०. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५१. श्रीमते विद्यातीर्थ-इन्द्रसरस्वत्यै नमः
५२. श्रीमते शङ्करानन्द-इन्द्रसरस्वत्यै नमः

- श्रीमते अद्वैतब्रह्मानन्दाय नमः
- श्रीमते विद्यारण्याय नमः
- अन्येभ्यः विद्यातीर्थ-शङ्करानन्द-शिष्येभ्यो नमः

५३. श्रीमते पूर्णानन्द-सदाशिव-इन्द्रसरस्वत्यै नमः
५४. श्रीमते व्यासाचल-महादेव-इन्द्रसरस्वत्यै नमः
५५. श्रीमते चन्द्रचूड-इन्द्रसरस्वत्यै नमः
५६. श्रीमते सदाशिवबोध-इन्द्रसरस्वत्यै नमः
५७. श्रीमते परमशिव-इन्द्रसरस्वत्यै नमः

- श्रीमते सदाशिवब्रह्म-इन्द्रसरस्वत्यै नमः

५८. श्रीमते विश्वाधिक-आत्मबोध-इन्द्रसरस्वत्यै नमः
५९. श्रीमते भगवन्नाम-बोध-इन्द्रसरस्वत्यै नमः
६०. श्रीमते अद्वैतात्मप्रकाश-इन्द्रसरस्वत्यै नमः

६१. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६२. श्रीमते शिवगीतिमाला-चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६३. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६४. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६५. श्रीमते सुदर्शन-महादेव-इन्द्रसरस्वत्यै नमः
६६. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६७. श्रीमते महादेव-इन्द्रसरस्वत्यै नमः
६८. श्रीमते चन्द्रशेखर-इन्द्रसरस्वत्यै नमः
६९. श्रीमते जयेन्द्रसरस्वत्यै नमः
७०. श्रीमते शङ्करविजयेन्द्रसरस्वत्यै नमः
७१. श्रीमते सत्य-चन्द्रशेखरेन्द्रसरस्वत्यै नमः

श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, नानाविधपरिमलपत्रपुष्पाणि समर्पयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, धूपम् आघ्रापयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, दीपं दर्शयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, अमृतं महानैवेद्यं पानीयं च निवेदयामि। निवेदनानन्तरम् आचमनीयं समर्पयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, कर्पूरताम्बूलं समर्पयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, मङ्गलनीराजनं दर्शयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रदक्षिणनमस्कारान् समर्पयामि।
श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणेभ्यो नमः, प्रार्थनाः समर्पयामि।

## ॥ स्वस्ति-वचनम् ॥

- स्वस्ति श्रीमद्-अखिल-भूमण्डलालङ्कार-त्रयस्त्रिंशत्-कोटि-देवता-सेवित-श्री-कामाक्षी-देवी-सनाथ-श्रीमद्-एकाम्रनाथ-श्री-महादेवी-सनाथ-श्री-हस्तिगिरिनाथ-साक्षात्कार-परमाधिष्ठान-सत्यव्रत-नामाङ्कित-काञ्ची-दिव्य-क्षेत्रे शारदामठ-सुस्थितानाम्
- अतुलित-सुधारस-माधुर्य-कमलासन-कामिनी-धम्मिल्ल-सम्फुल्ल-मल्लिका-मालिका-निःष्यन्द-मकरन्द-झरी-सौवस्तिक-वाङ्निगुम्फ-विजृम्भणानन्द-तुन्दिलित-मनीषि-मण्डलानाम्

- अनवरताद्वैत-विद्या-विनोद-रसिकानां निरन्तरालङ्कृतीकृत-शान्ति-दान्ति-भूम्नाम्
- सकल-भुवन-चक्र-प्रतिष्ठापक-श्रीचक्र-प्रतिष्ठा-विख्यात-यशोऽलङ्कृतानाम्
- निखिल-पाषण्ड-षण्ड-कण्टकोत्पाटनेन विशदीकृत-वेद-वेदान्त-मार्ग-षण्मत-प्रतिष्ठापकाचार्याणाम्
- परमहंस-परिव्राजकाचार्यवर्य-जगद्गुरु-श्रीमत्-शङ्करभगवत्पादाचार्याणाम्
- अधिष्ठाने सिंहासनाभिषिक्त-श्रीमद्-जयेन्द्र-सरस्वती-श्रीपादानाम्
- अन्तेवासि-वर्य-श्रीमत्-शङ्करविजयेन्द्र-सरस्वती-श्रीपादानां
- तदन्तेवासि-वर्य-श्रीमत्-सत्य-चन्द्रशेखरेन्द्र-सरस्वती-श्रीपादानां च
- चरण-नलिनयोः स-प्रश्रयं साञ्जलि-बन्धं च नमस्कुर्मः॥

# ॥श्रीचन्द्रशेखरेन्द्रसरस्वती-श्रीचरण-विषये श्रीमच्छङ्करविजयेन्द्रसरस्वतीश्रीचरणैः विरचितं सद्गुरु-दशकम्॥

श्रुति-स्मृति-पुराणोक्त-धर्म-मार्ग-रतं गुरुम्।
भक्तानां हित-वक्तारं नमस्ये चित्त-शुद्धये॥१॥

अद्वैतानन्द-भरितं साधूनाम् उपकारिणम्।
सर्व-शास्त्र-विदं शान्तं नमस्ये चित्त-शुद्धये॥२॥

कर्म-भक्ति-ज्ञान-मार्ग-प्रचारे बद्ध-कङ्कणम्।
अनुग्रह-प्रदातारं नमस्ये चित्त-शुद्धये॥३॥

भगवत्पाद-पादाब्ज-विनिवेशित-चेतसः ।
श्री-चन्द्रशेखर-गुरोः प्रसादो मयि जायताम्॥४॥

क्षेत्र-तीर्थ-कथाभिज्ञः सच्चिदानन्द-विग्रहः।
चन्द्रशेखर-वर्यो मे सन्निधत्तां सदा हृदि॥५॥

पोषणे वेद-शास्त्राणां दत्त-चित्तमहर्-निशम्।
क्षेत्र-यात्रा-रतं वन्दे सद्-गुरुं चन्द्रशेखरम्॥६॥

वेद-ज्ञान् वेदभाष्य-ज्ञान् कर्तुं यस्य समुद्यमः।
गुरुर्यस्य महादेवः तं वन्दे चन्द्रशेखरम्॥७॥

मणिवाचक-गोदादि-भक्ति-वागमृतैर्-भृशम्।
बालानां भगवद्-भक्तिं वर्धयन्तं गुरुं भजे॥८॥

लघूपदेशैर्-नास्तिक्य-भाव-मर्दन-कोविदम् ।
शिवं स्मित-मुखं शान्तं प्रणतोऽस्मि जगद्-गुरुम्॥९॥

विनयेन प्रार्थयेऽहं विद्यां बोधय मे गुरो।
मार्गमन्यं न जानेऽहं भवन्तं शरणं गतः॥१०॥
॥ इति श्रीचन्द्रशेखरेन्द्रसरस्वती-श्रीचरण-विषये
श्रीमच्छङ्करविजयेन्द्रसरस्वतीश्रीचरणैः विरचितं सद्गुरु-दशकम् ॥

# ॥ तोटकाष्टकम्॥

विदिता·खिल-शास्त्र-सुधा-जलधे
महितो·पनिषत्-कथिता·र्थ-निधे।
हृदये कलये विमलं चरणं
भव शङ्कर देशिक मे शरणम्॥१॥

करुणा-वरुणा·लय पालय मां
भव-सागर-दुःख-विदून-हृदम्।
रचया·खिल-दर्शन-तत्त्व-विदं
भव शङ्कर देशिक मे शरणम्॥२॥

भवता जनता सुहिता भविता
निज-बोध-विचारण-चारु-मते।
कलये·श्वर-जीव-विवेक-विदं
भव शङ्कर देशिक मे शरणम्॥३॥

भव एव भवा·निति मे नितरां
समजायत चेतसि कौतुकिता।
मम वारय मोह-महा-जलधिं
भव शङ्कर देशिक मे शरणम्॥४॥

सुकृतेऽधिकृते बहुधा भवतो
भविता सम-दर्शन-लालसता।
अति-दीन·मिमं परिपालय मां
भव शङ्कर देशिक मे शरणम्॥५॥

जगती·मवितुं कलिता·कृतयो
विचरन्ति महा-महस·श्छलतः।
अहिमां·शु·रिवा·त्र विभासि पुरो*
भव शङ्कर देशिक मे शरणम्॥६॥

गुरु-पुङ्गव पुङ्गव-केतन ते
समता·मयतां न हि कोऽपि सुधीः।
शरणा·गत-वत्सल तत्त्व-निधे
भव शङ्कर देशिक मे शरणम्॥७॥

विदिता न मया विशदै·क-कला
न च किञ्चन काञ्चन·मस्ति गुरो।
द्रुत·मेव विधेहि कृपां सह-जां
भव शङ्कर देशिक मे शरणम्॥८॥

॥इति श्री-तोटकाचार्यविरचितं श्री-तोटकाष्टकं सम्पूर्णम्॥

[* गुरो इति पाठान्तरम्]

जय जय शङ्कर हर हर शङ्कर
जय जय शङ्कर हर हर शङ्कर।
काञ्ची-शङ्कर कामकोटि-शङ्कर
हर हर शङ्कर जय जय शङ्कर॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन पूजनेन श्री-चन्द्रशेखरेन्द्र-सरस्वती-श्रीचरणाः प्रीयन्ताम्।

ॐ तत्सद्ब्रह्मार्पणमस्तु।

❁

# ॥ श्रीकाञ्चीकामकोटिपीठजगद्गुरुपरम्परास्तवः ॥

(पञ्चषष्टितमैः पीठाधिपतिभिः श्रीमत्सुदर्शनमहादेवेन्द्रसरस्वतीश्रीचरणैः प्रणीतः)

नारायणं पद्मभुवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं गौडपदं महान्तं
गोविन्दयोगीन्द्रमथास्य शिष्यम्॥ १ ॥

श्रीशङ्कराचार्यमथास्य पद्म-
पादं च हस्तामलकं च शिष्यम्।
तं तोटकं वार्तिककारमन्यान्
अस्मद्गुरून् सन्ततमानतोऽस्मि॥ २ ॥

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥ ३ ॥

सर्वतन्त्रस्वतन्त्राय सदाऽऽत्माद्वैतवेदिने।
श्रीमते शङ्करार्याय वेदान्तगुरवे नमः॥ ४॥

अविप्लुतब्रह्मचर्यान् अन्वितेन्द्रसरस्वतीन्।
आत्तमिथ्यावारपथान् अद्वैताचार्यसङ्घथान्॥ ५॥

आसेतुहिमवच्छैलं सदाचारप्रवर्तकान्।
जगद्गुरून् स्तुमः काञ्चीशारदामठसंश्रयान्॥ ६ ॥

पवित्रितेतराद्वैतमठपीठीशिरोभुवे ।
श्रीकाञ्चीशारदापीठगुरवे भवभीरवे॥ ७॥

वार्तिकादिब्रह्मविद्याकर्त्रे ब्रह्मावतारिणे।
सुरेश्वराचार्यनाम्ने योगीन्द्राय नमो नमः॥ ८॥

अपोऽश्नन्नेव जैनान् य आप्राग्ज्योतिषमाच्छिनत्।
शिशुमाचार्यवाग्वेणीरयरोधिमहोबलम् ॥ ९॥

सङ्क्षेपशारीरमुखप्रबन्धविवृताद्वयम् ।
ब्रह्मस्वरूपार्यभाष्यशान्त्याचार्यकपण्डितम्॥ १०॥

सर्वज्ञचन्द्रनाम्ना च सर्वतो भुवि विश्रुतम्।
सर्वज्ञसद्गुरुं वन्दे सर्वज्ञमिव भूगतम्॥ ११॥

मेधाविनं सत्यबोधं व्याधूतविमतोच्चयम्।
प्राच्यभाष्यत्रयव्याख्याप्रवीणं प्रभुमाश्रये॥ १२॥

ज्ञानानन्दमुनीन्द्रार्यं ज्ञानोत्तमपराभिधम्।
चन्द्रचूडपदासक्तं चन्द्रिकाकृतमाश्रये॥ १३॥

शुद्धानन्दमुनीन्द्राणां विद्धार्हतमतत्विषाम्।
आनन्दज्ञानसेव्यानाम् आलम्बे चरणाम्बुजम्॥ १४॥

सर्वशाङ्करभाष्यौघभाष्यकर्तारमद्वयम्।
सर्ववार्तिकसद्वृत्तिकृतं श्रीशैलगं भजे॥ १५॥

कैवल्यानन्दयोगीन्द्रान् केवलं राजयोगिनः।
कैवल्यमात्रनिरतान् कलयेम जगद्गुरून्॥ १६॥

श्रीकृपाशङ्करार्याणां मर्यादातीततेजसाम्।
षण्मताचार्यकजुषाम् अङ्घ्रिद्वन्द्वमहं श्रये॥ १७॥

महिष्ठाय नमस्तस्मै महादेवाय योगिने।
सुरेश्वरापराख्याय गुरवे दोषभीरवे॥ १८॥

स्तुमः सदा शिवानन्दचिद्घनेन्द्रसरस्वतीन्।
कामाक्षीचन्द्रमौल्यर्चाकलनैकलसन्मतीन्॥ १९॥

सार्वभौमाभिधमहाव्रतचर्यापरायणान्।
वन्दे जगद्गुरूंश्चन्द्रशेखरेन्द्रसरस्वतीन्॥ २०॥

समाद्वात्रिंशदत्युग्रकाष्ठमौनसमाश्रयान् ।
जितमृत्यून् महालिङ्गभूतान् सच्चिद्घनान् नुमः॥ २१॥

महाभैरवदुस्तन्त्रदुर्दान्तध्वान्तभास्करान् ।
विद्याघनान् नमस्यामि सर्वविद्याविचक्षणान्॥ २२॥

आचार्यपदपाथोजपरिचर्यापरायणम् ।
गङ्गाधरं नमस्यामः सदा गङ्गाधरार्चकम्॥ २३॥

जगज्जयिसुसौराष्ट्रजरदृष्टिमदापहान् ।
शकसिल्हकदर्पघ्नान् ईडीमहि महायतीन्॥ २४॥

चतुस्समुद्रीक्रोडस्थवर्णाश्रमविचारकान् ।
श्रितविप्रव्रजस्कन्धसुवर्णान्दोलिकाचरान्॥ २५॥

प्रत्यहं ब्रह्मसाहस्रसन्तर्पणधृतव्रतान्।
सदाशिवसमाह्वानान् स्मरामः सद्गुरून् सदा॥ २६॥

मायालोकायतीभूतबृहस्पतिमदापहान् ।
वन्दे सुरेन्द्रवन्द्याङ्घ्रीन् श्रीसुरेन्द्रसरस्वतीन्॥ २७॥

श्रीविद्याकरुणालब्धब्रह्मविद्याहृतामयान् ।
वन्दे वशंवदप्राणान् मुनीन् विद्याघनान् मुहुः॥ २८॥

विद्याघनकृपालब्धसर्ववेदान्तविस्तरम् ।
कौतस्कुतोत्पातकेतुं निश्शङ्कं नौमि शङ्करम्॥ २९॥

चन्द्रचूडपदध्यानप्राप्तानन्दमहोदधीन् ।
यतीन्द्रांश्चन्द्रचूडेन्द्रान् स्मरामि मनसा सदा॥ ३०॥

नमामि परिपूर्णश्रीबोधान् ग्रावाभिलापकान्।
यदीक्षणात् पलायन्त प्राणिनामामयाधयः॥ ३१॥

सच्चित्सुखान् प्रपद्येऽहं सुखम् आप्तगुहास्थितीन्।
चित्सुखाचार्यमीडेऽहं सत्सुखं कोङ्कणाश्रयम्॥ ३२॥

भजे श्रीसच्चिदानन्दघनेन्द्रान् रससाधनात्।
लिङ्गात्मना परिणतान् प्रभासे योगसंश्रिते॥ ३३॥

भगवत्पादपादाब्जासक्तिनिर्णिक्तमानसान्।
प्रज्ञाघनं चिद्विलासं महादेवं च मैथिलम्॥ ३४॥

पूर्णबोधं च बोधं च भक्तियोगप्रवर्तकम्।
ब्रह्मानन्दघनेन्द्रं च नमामि नियतात्मनः॥ ३५॥

चिदानन्दघनेन्द्राणां लम्बिकायोगसेविनाम्।
जीर्णपर्णाशिनां पादौ प्रपद्ये मनसा सदा॥ ३६॥

सच्चिदानन्दनामानं शिवार्चनपरायणम्।
भाषापञ्चदशीप्राज्ञं भावयामि सदा मुदा॥ ३७॥

भूप्रदक्षिणकर्मैकसक्तं श्रीचन्द्रशेखरम्।
त्रातदावाग्निसन्दग्धकिशोरकमुपास्महे॥ ३८॥

चित्सुखेन्द्रं सुखेनैव क्रान्तसह्यगुहागृहम्।
कामरूपचरं नानारूपवन्तमुपास्महे॥ ३९॥

निर्दोषसंयमधरान् चित्सुखानन्दतापसान्।
विद्याघनेन्द्रान् श्रीविद्यावशीकृतजनान् स्तुमः॥ ४०॥

शङ्करेन्द्रयतीन्द्राणां पादुके ब्रह्मसम्भृते।
नमामि शिरसा याभ्यां त्रीन् लोकान् व्यचरन्मुनिः॥ ४१॥

सच्चिद्विलासयोगीन्द्रं महादेवेन्द्रमुज्ज्वलम्।
गङ्गाधरेन्द्रमप्येतान् नौमि वादिशिरोमणीन्॥ ४२॥

ब्रह्मानन्दघनेन्द्राख्यांस्तथाऽऽनन्दघनान् अपि।
पूर्णबोधमहर्षींश्च ज्ञाननिष्ठानुपास्महे॥ ४३॥

वृत्त्याऽऽजगर्या श्रीशैलगुहागृहकृतस्थितीन्।
श्रीमत्परशिवाभिख्यान् सर्वातीतान् श्रये सदा॥ ४४॥

अन्योन्यसदृशान्योन्यौ बोधश्रीचन्द्रशेखरौ।
प्रणवोपासनासक्तमानसौ मनसा श्रये॥ ४५॥

मुक्तिलिङ्गार्चनानन्दविस्मृताशेषवृत्तये।
चिदम्बररहस्यन्तर्लीनदेहाय योगिने॥ ४६ ॥

अद्वैतानन्दसाम्राज्यविद्रुताशेषपाप्मने।
अद्वैतानन्दबोधाय नमो ब्रह्म समीयुषे॥ ४७॥

श्रये महादेवचन्द्रशेखरेन्द्रमहामुनी।
महाव्रतसमारब्धकोटिहोमान्तगामिनौ॥ ४८॥

विद्यातीर्थसमाह्वानान् श्रीविद्यानाथयोगिनः।
विद्यया शङ्करप्रख्यान् विद्यारण्यगुरून् भजे॥ ४९॥

सच्चिद्धनेन्द्रान् अद्वैतब्रह्मानन्दमुनीनपि।
सान्द्रानन्दयतीन्द्रांश्च तथाप्यद्वैतशेवधीन्॥ ५०॥

महादेवशिवाद्वैतसुखानन्दयतीश्वरौ ।
मनसा भावये नित्यं महासंयमधारिणौ॥ ५१॥

वीक्षणात् सर्वभूतानां विषव्याधिनिबर्हणम्।
शिवयोगीश्वरं साक्षाच्चिन्तयामि सदा मुदा॥ ५२॥

प्रत्यग्ज्योतिःप्रकाशेन्द्रान् प्रत्यग्ज्योतिरुपासिनः।
न्यक्कृताशेषदुस्तर्ककार्कश्यान् सततं स्तुमः॥ ५३॥

शङ्करानन्दयोगीन्द्रपदपङ्कजयोर्युगम्।
बुक्कभूपशिरोरत्नं स्मरामि सततं हृदा॥ ५४॥

श्रीपूर्णानन्दमौनीन्द्रं नेपालनृपदेशिकम्।
अव्याहतस्वसञ्चारं संश्रयामि जगद्गुरुम्॥ ५५॥

महादेवश्च तच्छिष्यश्चन्द्रशेखरयोग्यपि।
स्तां मे हृदि सदा धीरावद्वैतमतदेशिकौ॥ ५६॥

प्रवीरसेतुभूपालसेविताङ्घ्रिसरोरुहान् ।
भजे सदाशिवेन्द्रश्रीबोधेश्वरगुरून् सदा॥ ५७॥

सदाशिवश्रीब्रह्मेन्द्रधृतस्वपद्पादुकान् ।
धीरान् परशिवेन्द्रार्यान् ध्यायामि सततं हृदि॥ ५८॥

आत्मबोधयतीन्द्राणाम् आशीताचलचारिणाम्।
अन्यश्रीशङ्कराचार्यधीकृतामङ्घ्रिमाश्रये ॥ ५९॥

भगवन्नामसाम्राज्यलक्ष्मीसर्वस्वविग्रहान्।
श्रीमद्बोधेन्द्रयोगीन्द्रदेशिकेन्द्रानुपास्महे ॥ ६०॥

अद्वैतात्मप्रकाशाय सर्वशास्त्रार्थवेदिने।
विधूतसर्वभेदाय नमो विश्वातिशायिने॥ ६१॥

आ सप्तमाज्जीर्णपर्णजलवातारुणांशुभिः।
कृतस्वप्राणयात्राय महादेवाय सन्नतिः॥ ६२॥

चोलकेरलचेरौड्रपाण्ड्यकर्णाटकोङ्कणान्।
महाराष्ट्रान्ध्रसौराष्ट्रमगधादींश्च भूभुजः॥ ६३॥

शिष्यान् आसेतुशीताद्रि शासते पुण्यकर्मणे।
श्रीचन्द्रशेखरेन्द्राय जगतो गुरवे नमः॥ ६४॥

निष्पापवृत्तये नित्यनिर्धूतभवक्लृप्तये।
महादेवाय सततं नमोऽस्तु नतरक्षिणे॥ ६५॥

श्रीविद्योपासनादार्ढ्यवशीकृतचराचरान् ।
श्रीचन्द्रशेखरेन्द्रार्यान् शङ्करप्रतिमान् नुमः॥ ६६॥

श्रीकाञ्चीशारदापीठसंस्थितानाम् इमां क्रमात्।
स्तुतिं जगद्गुरूणां यः पठेत् स सुखभाग् भवेत्॥ ६७॥

**॥ परिशिष्टम् - १ ॥**

(अत्र १-४ पद्यानि पोलहग्रामाभिजनैः श्रीरामशास्त्रिभिः प्रकाशितानि। ५ पद्यं नवषष्टितमैः पीठाधिपतिभिः श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः रचितम्। ६-७ पद्ये शिमिलिग्रामाभिजनैः राधाकृष्णशास्त्रिभिः विरचिते।)

कलानन्दपरब्रह्मानन्दानुभवतुन्दिलान्।
महादेवेन्द्रयमिनः सततं संश्रये हृदा॥ ६८॥

प्रतिदिनविहितश्रीचन्द्रमौलीश्वरार्चा-
प्रसितसकलदेहः प्रौढपुण्यानुभावः।
मनसि सततमास्तां श्रीमहादेवनामा
मम गुरुरितकाञ्चीशारदापीठसीमा॥ ६९॥

अतिबाल्यविधृतसंयमविमलमनःसेवितेशचरणयुगान्।
श्रीचन्द्रशेखरेन्द्रान् साम्प्रतमाचार्यशेखरान् प्रणुमः॥ ७०॥

लक्ष्मीनारायण इति पूर्वाश्रमनामभूषितं शान्तम्।
ऋग्वेदे सम्यगधीतिनं महादेवमाश्रयामि गुरुम्॥ ७१॥

अपारकरुणासिन्धुं ज्ञानदं शान्तरूपिणम्।
श्रीचन्द्रशेखरगुरुं प्रणमामि मुदाऽन्वहम्॥ ७२॥

परित्यज्य मौनं वटाधःस्थितिं च
व्रजन् भारतस्य प्रदेशात् प्रदेशम्।
मधुस्यन्दिवाचा जनान् धर्ममार्गे
नयन् श्रीजयेन्द्रो गुरुर्भाति चित्ते॥ ७३॥

नमामः शङ्करान्वाख्यविजयेन्द्रसरस्वतीम्।
श्रीगुरुं शिष्टमार्गानुनेतारं सन्मतिप्रदम्॥ ७४॥

सत्यनारायणक्षेत्रात् सत्यव्रतमुपागतम्।
आश्रये कामकोटीशं सत्यश्रीचन्द्रशेखरम्॥ ७५॥

❀❀❀